5. अधोलिखितयोः पद्ययोः ससन्दर्भ व्याख्या विलिख्यताम् - 20

(क) प्रफुल्ल पद्मस्थमधुव्रताक्षी मनोज्ञ चारूस्मितशोभिवक्त्रा।
सुरालयस्था बलिदापिकेव प्रभोर्ध्वचक्रं परितः किरन्ती।।

(ख) दुरन्तहृत्तापकरेतिवृत्तं निमेषपूर्वं प्रवभूव यत्र।
अखण्डमानन्दलसद् विधानं रराज तत्रैव बलादिदानीम्।।

## तृतीयो - वर्गः

6. अधोलिखितयोः सूत्रयोः व्याख्या विधेया - 20

(क) शब्दस्यैको व्यापारस्तिस्रो वृत्तयश्च ।

(ख) आधिभौतिकाधिदैविकाध्यात्मिक विश्वत्रयसमुन्मीलनपुरस्सरं भूषणवारण पर्याप्त्याधायकत्वमलङ्कारत्वम् ।

7. अधोलिखितयोः सूत्रयोः व्याख्या विधेया - 20

(क) जागरिता प्रतिभा तस्य कारणम्।

(ख) त्रयाणां च सकलः समुतलासो जीवनम्।

इइ

## चतुर्थो - वर्गः

8. अभिनवकाव्यालङ्कारसूत्रे प्रतिपादितानां काव्यभेदानां परिचयो प्रदीयताम्। 20

9. अभिनवकाव्यालङ्कारसूत्रे निरूपितस्य काव्यप्रयोजनस्य समीक्षणं विधीयताम्। 20



A **(Printed Pages 4)**

**Roll. No. ____________**

# AS-2150

## एम.ए. (चतुर्थ सेमेस्टर) परीक्षा, 2015

## संस्कृत (साहित्य वर्ग)

### तृतीय प्रश्न - पत्र

### (आधुनिकसंस्कृतसाहित्यम् अभिनवकाव्यशास्त्रञ्च)

**समयः - घण्टात्रयम्** **पूर्णाङ्काः - 100**

**निर्देश : पञ्च**प्रश्नाः समाधेयाः। प्रथमः प्रश्नोऽनिवार्यः। प्रतिवर्गम् च **एकः** प्रश्नोऽवश्यसमाधेयः

1. अधोलिखितानां लघूत्तराणि विलिख्यन्ताम् - 4×5=20

(क) आधुनिकाः काव्यशास्त्रिणः।

(ख) पद्मिनीरत्नसिंहवरयात्रा।

(ग) गौतमनन्दनस्य कुटीरम् ।

(घ) शब्दस्यैकैव व्यापारः सङ्केत इति यो मतः।

(ङ.) चतुर्विधाः समीक्षकाः।

## प्रथमो - वर्गः 20

2. अधोलिखितयोः ससन्दर्भ व्याख्या विधीयताम् -

(क) सानन्दं निर्विघ्ननमुपयमनानन्तरं बीकानेर-मण्डलान्तर्गतपूगल प्रदेशान्मौर्यकनृपतिचित्र-कविनिर्मितं विचित्रं चित्रकूटं (चित्तौड़दुर्गम् ) प्रति प्रतस्थे वरयात्रा।

मध्यभागे व्यराजत रजतमहारजततन्तुस्यूतामल- मखमल्लतूलिका-वृहदुपधानसुशोभितो मौक्तिकगुम्फितकौशेयमादिकः कर्णीरथः। तत्राशोभत महारावलराज-राजेश्वररत्नसिंहेन साकं नवपरिणीता प्रतिहारपंवार वंशविभूषणा ललनाललामभूता पद्मगन्धा पद्मिनी । तदनु कम्बलिवाह्यकेषु पद्मावतीपरिचिताः प्रमुखा दास्यः।

(ख) दूरत एव वारणानां वृंहणं हयानां ह्रेषणं वाद्यकानां वादनञ्चाकर्ण्य ग्रामेभ्यो ग्रामटिकाभ्यो निष्क्रम्य गृहिण्यः स्वीयमावश्यकमपि कार्यजातमपास्य दम्पतीदिदृक्षया यात्रायनमुभयतः श्रेणिवद्धास्तिष्ठन्त्यः प्रतीक्षापरायणाः संवृत्ताः। अर्धहोरानन्तरं पार्श्वमायाते कर्णीश्थे पद्मिनीरूपलावण्यमालोक्याश्चर्यचकितास्ताः सरसिजयोनेः सौन्दर्यनिर्माणकलां पक्षपातपूर्णामेव व्याहृतवत्यः। तत्र काश्चित् सघः सञ्जातोद्वाहाः सुन्दर्यः स्वीयलावण्यं तल्लावण्यकल्पमिव परिकल्प्य स्रष्टारं बहुमानपुरस्सरं शंसितवत्यः। वरं विलोक्य काचिद्बाला मनस्येवं प्रार्थितवती- हे भगवन्! ममापि प्राणवल्लभः स्यान्महीपतिसदृश एव कश्चित् कमनीयो युवकः।

3. अधोलिखितयोः ससन्दर्भव्याख्या विधीयताम् - 20

(क) मध्याह्ने मरूमार्गे मार्तण्डमयूखसन्तापसञ्जातस्वेदद्रिदेहो रत्नसिंहः शीतलसमीर सेवनार्थं यावदेव कर्णीरथ प्रतीहारलम्बमानयवनिकामपहृत वान् तावदेव बलादन्तः





प्रविश्य कामयितेवानिलो मुखावलोकनकामः पद्मिनी शिरः स्थितवृहतिका- विहितावगुण्ठनमपाकरोत्। सहसा व्रीडावनतवदनारविन्दा सा रोमाञ्चिता सञ्जाता। स्वीयकरारविन्देन तदाननमुन्नमय्य न्यगादीन्नरेश्वरः अहो! मनोज्ञं दर्शनञ्जातं राकापतेः, साम्प्रतं का शक्तिः सन्तापयितुं तपनस्य कामस्य वराकस्य वा।

(ख) स्वीयशरीरसंस्थितशक्तिमाध्यमेन ब्रह्माण्ड स्थिताना- मदृश्यशक्तीनां ज्ञानमेव तत्वतस्तान्त्रिकीपूजायाः समाधारः। तान्त्रिकाणां मुख्यदेवाः - शिवः, शक्तिः, भैरवः, तद्गणाश्च वरीवृत्यन्ते। तान्त्रिक परिकल्पनायामेतेषां वेविद्यन्ते स्वरूपाणि विभिन्नानि। तान्त्रिकविचारानुसारं मानवपृष्ठास्थिस्थित सुषुम्नानाडिकायां तिष्ठति कुण्डलिनी शक्तिः शयिता, शरीरे, स्थाने स्थाने वेविद्यन्ते मूलाधारादीनि षद्चक्राणि। तान्त्रिक साधकाः स्वीयसिद्धान्तसाधनयैव कुण्डलिनीं जागरितुं शक्नुवन्ति नितान्तम् । अनया बोभूयन्ते सर्वथादृश्चशक्तयः स्वायत्ता।

## द्वितीयो - वर्गः

4. अधोलिखितयोः पद्ययोः ससन्दर्भव्याख्या विलिख्यताम् - 20

(क) मखोत्थ धूमावलिसम्परीतं ज्वत्पुरोडाशलसत्समीरम्।
विलोलखेलोपनत प्रबन्धैर्महर्षिभिश्चार्थितयोगचर्यम्।।

(ख) स्वसंततिः प्रीतिकरी न केषां मुदीव ननु पार्णवेन्दोः।
तथापि मेघावरणैर्विपन्ना भवेदसौ तत्र न चन्द्रदोषः।।